श्रीमते रामानुजाय नमः

# ॥ नारायणोपनिषत् ॥

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजा सृजेयेति। नारायणात्प्राणो जायते।
मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।
नारायणाद्ब्रह्मा जायते। नारायणाद्रुद्रो जायते। नारायणादिन्द्रो जायते।
नारायणात्प्रजापतयः प्रजायन्ते। नारायणाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि
च छन्दाꣳसि। नारायणादेव समुत्पद्यन्ते। नारायणे प्रवर्तन्ते। नारायणे प्रलीयन्ते॥

ॐ अथ नित्यो नारायणः। ब्रह्मा नारायणः। शिवश्च नारायणः। शक्रश्च नारायणः।
द्यावापृथिव्यौ च नारायणः। कालश्च नारायणः। दिशश्च नारायणः। ऊर्ध्वश्च नारायणः।
अधश्च नारायणः। अन्तर्बहिश्च नारायणः। नारायण एवेदꣳ सर्वम्। यद्भूतं यच्च भव्यम्।
निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः। न द्वितीयोऽस्ति
कश्चित्। य एवं वेद। स विष्णुरेव भवति स विष्णुरेव भवति॥

ॐइत्यग्रे व्याहरेत्। नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ॐइत्येकाक्षरम्।
नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि। एतद्वै नारायणस्याष्टाक्षरं पदम्।
यो ह वै नारायणस्याष्टाक्षरं पदमध्येति। अनपब्रवस्सर्वमायुरेति। विन्दते
प्राजापत्यंरायस्पोषं गौपत्यम्। ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति।
य एवं वेद॥

श्रीमते रामानुजाय नमः

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम्। अकार उकार मकार इति। तानेकधा समभरत्तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्। ॐ नमो नारायणायेति मन्त्रोपासकः। वैकुण्ठभुवनलोकं गमिष्यति। तदिदं परम् पुण्डरीकं विज्ञानघनम्। तस्मात्तदिदावन्मात्रम्। ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम्। कारणरूपमकार परब्रह्मोम्। एतदथर्व शिरोयोऽधीते। प्रातरधीयानो रात्रिकृतव् पापं नाशयति। सायमधीयानो दिवसकृतव् पापं नाशयति। माध्यन्दिनमादित्याभिमुखोऽधीयानः पञ्चपातकोपपातकात् प्रमुच्यते। सर्व वेद पारायण पुण्यं लभते। नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति। य एवम् वेद। इत्युपनिषत्॥

**॥ इति नारायणोपनिषत्॥**